अस-इन्। २खड्गे पु० "असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः। श्रीगर्भो विजयश्चैव धर्मपालो नमोऽस्तु ते। इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा"। खड्गपूजा-मन्त्रः, "सर्वाः श्यामाः असिकरा मुण्डमाला विभूषिताः" श्यामाकवचम् खड्गलक्षणन्तु वृह०उक्तम् "अङ्गुलशतार्ध-मुत्तम जनः स्यात्पञ्चविंशतिः खड्गः। अङ्गुल-मानाज्ज्ञेयो व्रणोऽशुभो विषमपर्वस्थः॥ श्रीवृक्षवर्ध-मानातपत्रशिवलिङ्गकुण्डलाब्जानाम्। सदृशा व्रणाः प्रशस्ता ध्वजायुधस्वस्तिकानां च॥ कृकलासकाककङ्क-क्रव्यादकबन्धवृश्चिकाकृतयः। खड्गे व्रणा न शुभदा वंशानुगाः प्रभूताश्च॥ स्फुटितो ह्रस्वः कुण्ठो वंशच्छिन्नो न दृङ्मनोऽनुगतः। अस्वन इति चानिष्टः प्रोक्तविप-र्य्यस्त इष्टफलः॥ क्वणितं मरणायोक्तं पराजयाय प्रवर्त्तनं कोशात्। स्वयमुद्गीर्णे युद्धं ज्वलिते विजयो भवति खड्गे॥ नाकारणं विवृणुयान्न विघट्टयेच्च पश्येन्न तत्र वदनम् न वदेच्च मूल्यम्। देशं न चास्य कथयेत् प्रति-मानयेच्च नैव स्पृशेन्नृपतिरप्रयतोऽसियष्टिम्॥ गोजिह्वा-संस्थानो नीलोत्पलवंशपत्रसदृशश्च। करवीरपत्रशूलाग्र-मण्डलाग्राः प्रशस्ताः स्युः॥ निष्पन्नो न च्छेद्यो निकषैः कार्य्यः प्रमाणयुक्तः सः। मूले म्रियते स्वामी जननी तस्याग्रतश्छिन्ने॥ यस्मिन् त्सरुप्रदेशे व्रणो भवेत्तद्वदेव खड्गस्य। वनितानामिव तिलको गुह्ये वाच्यो मुखे दृष्ट्वा॥ अथ वा स्पृशति यदङ्गं प्रष्टा निस्त्रिंशभृत्तदव-धार्य। कोशस्थस्यादेश्यो व्रणोऽसि शास्त्रं विदित्वेदम्। शिरसि स्पृष्टे प्रथमेऽङ्गुले द्वितीये ललाटसंस्पर्शे। भ्रूमध्ये च तृतीये नेत्रे स्पृष्टे चतुर्थे च॥ नासोष्ठकपोल-हनुश्रवणग्रीवांसकेषु पञ्चाद्याः। उरसि द्वादशसंस्थस्त्रयो-दशे कक्षयोर्ज्ञेयः॥ स्तनहृदयोदरकुक्षिनाभीषु चतुर्दशा-दयो ज्ञेयाः। नाभीमूले कट्यां गुह्ये चैकोनविंशतितः॥ ऊर्वोर्द्वाविंशे स्याद् ऊर्वोर्मध्ये व्रणस्त्रयोविंशे। जानुनि च चतुर्विंशे जङ्घायां पञ्चविंशे च॥ जङ्घामध्ये गुल्फे पार्ष्णौ पादे तदङ्गुलीष्वपि च। षड्विंशतिकाद्याव-त्त्रिंशदिति मतेन गर्गस्य॥ पुत्रमरणं धनाप्तिर्धनहानिः सम्पदश्च बन्धश्च। एकाद्यङ्गुलसंस्थैर्व्रणैः फलं निर्दिशेत्-क्रमशः॥ सुतलाभः कलहो हस्तिलब्धयः पुत्रमरणधन-लाभौ। क्रमशो विनाशवनितात्प्तिचित्तदुःखानि षट्-प्रभृति॥ लब्धिर्हानिस्त्रीलब्धयो बधो वृद्धिमरणपरि-तोषाः। ज्ञेयाश्चतुर्दशादिषु धनहानिश्चैकविंशे स्यात्॥

वित्ताप्तिरनिर्वाणं धनागमो मृत्युसम्पदोऽस्वत्वम्। ऐश्वर्य्य-मृत्युराज्यानि च क्रमात्त्रिंशदिति यावत्॥ परतो न विशेषफलं विषमसमस्थास्तु पापशुभफलदाः। कैश्चिदफलाः प्रदिष्टास्त्रिंशत्परतोऽग्रमिति यावत्॥ करवीरोत्पल-गजमदघृतकुङ्कुमकुन्दचम्पकसगन्धः। शुभदोऽनिष्टो गोमूत्र-पङ्कमेदःसदृशगन्धः॥ कूर्मवसासृक्क्षारोपमश्च भयदुःखदो भवति गन्धः। वैदूर्य्यकनकविद्युत्प्रभो जयारोग्यवृद्धिकरः॥ इदमौशनसं च शस्त्रपानं रुधिरेण श्रियमिच्छतः प्रदी-प्तम्। हविषा गुणवत्सुताभिलिप्सोः सलिलेनाक्षय-मिच्छतश्च वित्तम्॥ बड़वोष्ट्रकरेणुदुग्धपानं यदि पापेन समीहतेऽर्थसिद्धिम्। झषपित्तमृगाश्ववस्तदुग्धैः करि-हस्तच्छिदये सतालगर्भैः॥ आर्कं पयो हुडुविषाणमसी-समेतं पारावताखुशकृता च युतं प्रलेपः। शस्त्रस्य तैल-मथितस्य ततोऽस्य पानं पश्चाच्छितस्य न शिलासु भवे-द्विघातः॥ क्षारे कदल्या मथितेन युक्ते दिनोषिते पायितमायसं यत्। सम्यक् शितं चाश्मनि नैति भङ्गं न चान्यलोहेष्वपि तस्य कौण्ठ्यम्" वृ०स०। हेमा०परि० ख० तु तज्जात्यादिभेदात् फलभेदादिकं दर्शितं यथा "वत्स! पुरा भूतपूर्वैराचार्यैरुपदिष्टञ्चैव यन्मयाश्रुतं तदु-पदिशामि निबोध खड्गस्य लोहं षड्विधं भवति। योनयः पञ्चविधाः संस्थानं चतुर्विधं करणमाकृतिर्द्विधा द्वादश मुखानि गौरवं पञ्चदशधा विस्तारस्त्रिविधः वर्णच्छायाव्रणपुङ्ख-गन्धस्वरेण वा यत्र विशेषा भवन्ति तत्कीर्त्त्यमानं निबोध तीक्ष्णं मृदु स्निग्धं खरं मृदुतीक्ष्णं वज्रं चेति जातयः षट्भवन्ति वालुका मृत्पाषाणः पङ्को धातुस्तावच्चेति योनयः पञ्चधा भवन्ति। पीतेभ्यस्तीक्ष्णं भवति। नीलेभ्योमृदु भवति। स्निग्धेभ्यःस्निग्धं खरेभ्यः खरं भवति। रक्तेभ्यो-द्रव्येभ्योमृदुतीक्ष्णं भवति। रक्तसैन्धवसन्निभैर्हरिद्भिः श्चितं यदन्तः उत्पद्यते लौहं तद्वज्रायुधन्नाम भवति। तच्च पाषाण एव पूजित इति। भवन्ति चात्र श्लोकाः। तापं चिरादेव विचूर्णितञ्च भिन्नाञ्जनाभं बहुसूक्ष्महीरम् पीतं भवेत् निर्म्मलरूक्मवर्णं सर्वाणि लोहानि भिनत्ति तीक्ष्णम्। सन्नम्यते तापमुपैति चाशु श्वेतं भवत्येव मलावनद्धम्। यत्-स्थूलहीरन्त्वपुवङ्गवर्णं सर्वेषु कार्य्येष्वपि तन्मृदु स्यात्। श्वेतं भवत्यभ्यधिकं स्थिरञ्च संघट्टनामेति चिराच्च तापम्। संघा-तलोहेन चिराद्वियोगं स्निग्धञ्च लोहं प्रवदन्ति तज्ज्ञाः। खरं विशीर्य्येत न चैति योगम् सर्वत्र योग्यं मृदुतीक्ष्ण-माहुः। यज्जातरूपं न च दह्यतेऽग्नौ तद्वज्रलोहं प्रसमीक्ष्य